# माध्यमिकशिक्षापाठ्यक्रमः

# शुक्लयजुर्वेदः

**कक्षा : ९–१०** **विषयसङ्केतः : (कक्षा ९ Suk. 301 कक्षा १० Suk. 302)**

**पाठ्यघण्टा : ५** **वार्षिककार्यघण्टा : १६०**

## १. परिचयः

शब्दराश्यात्मको वेदो विश्वेषामनुपमो ज्ञानमहोदधिर्वर्तते । विश्वस्मिन् जगति प्राचीनतमग्रन्थरूपेण प्रथितस्य वेदस्य स्थानं सर्वोपरि विद्यते । प्राच्यप्रतीच्योभयविद्यानां सकलज्ञानविज्ञानानां स्रोतोऽयं वेदः पौरस्त्यसाहित्यस्य सनातनसंस्कृतेश्चाऽऽधारशिला मन्यते । गुरुशिष्यपरम्परया श्रुतिमाध्यमेन संरक्षितोऽसौ धर्माधाररूपेण समादृतोऽस्ति- **वेदोऽखिलो धर्ममूलम्** इति । इष्टवस्तुनः प्राप्तिरनिष्टवस्तुनः परिहारश्च वेदाध्ययनात् सम्भवतीति वैदिकमभिमतम् । वेदस्याध्ययनं गुरुमुखोच्चारणमनुसृत्य मन्त्रोच्चारणपूर्वकं विधीयते- **वेदस्याध्ययनं सर्वं गुर्वध्ययनपूर्वकम्** इति । सा परम्पराऽद्यापि प्रचलन्ती विद्यते । ब्रह्मपरम्परया प्राप्तं वेदं महर्षयः स्वतपसा साक्षात्कृतवन्तः । ते च महर्षयः स्वशिष्येभ्य उपदिदिशुः । द्वापरस्यान्ते भगवान् वेदव्यासो मन्दमतीन् मनुष्यान् विचिन्त्य वेदं चतुर्धा विव्यास । ऋग्यजुस्सामाथर्वाख्यान् तान् वेदान् पैलवैशम्पायनजैमिनिसुमन्तुभ्यः क्रमादुपदिदेश । शिष्यप्रशिष्यक्रमेणोपदेशपरम्परया विस्तृतो वेदः सहस्रशाखो जातः । ऋग्वेदस्यैकविंशतिः, यजुर्वेदस्यैकोत्तरशतम् (शुक्लयजुर्वेदस्य पञ्चदश, कृष्णयजुर्वेदस्य च षडशीतिः), सामवेदस्य सहस्रम्, अथर्ववेदस्य च नव शाखाः आसन् । तत्राधुना ऋचस्तिस्रः, यजुषस्तिस्रः, साम्नस्तिस्रः, आथर्वणो द्वे चेति संहत्यैकादश शाखानामेवाध्ययनाध्यापनपरम्परा दृश्यते ।

वेदेषु पारलौकिकमैहिकञ्च दर्शनम्, मानवीया मूल्यमान्यता, कर्तव्याकर्तव्ये, जीवनजगतोर्याथार्थ्यम् इत्यादयो विषयाः समुपलभ्यन्ते । तथैव समाजव्यवस्था, साहित्यम्, राजनीतिः, गणितम्, खगोलम्, भूगोलम्, पर्यावरणम् इत्यादय आधुनिकविषयाश्च वेदेष्वन्वेष्टुं शक्यन्ते । एतेषामेव बोधो बुद्धविषयाणामभिव्यक्तिसामर्थ्यं व्यवहारेऽनुसरणं च छात्रेषु भवेदिति हेतोर्विद्यालयशिक्षायां वेदविषयो समाविष्टोऽस्ति । उच्चशिक्षायां प्रौढतायै शुक्लयजुर्वेदविषयस्य कर्मकाण्डविषयस्य चाऽऽधारभूमिरूपेण पाठ्यक्रमोऽसौ विकासं नीतोऽस्ति ।

अयं पाठ्यक्रमः शुक्लयजुर्वेदस्य माध्यन्दिशाखासम्बद्धो वर्तते । शाखायामस्यां ४० अध्यायाः, ३०३ अनुवाकाः, १९७५ कण्डिकाः सन्ति । तासु कण्डिकासु प्रामुख्येन यज्ञयागादिनिरूपणं विहितमस्ति । माध्यमिकशिक्षायाः पाठ्यक्रमेऽस्मिन् विंशतितमादध्यायादारभ्य चत्वारिंशदध्यायान्ताः सर्वाः कण्डिकाः पाठ्यविषयत्वेन निर्धारिताः सन्ति । एतेष्वध्यायेषु सौत्रामणी, अश्वमेधः, पुरुषमेधः, सर्वमेधः, पितृमेधादियज्ञसम्बद्धानां विषयाणां वर्णनमुपलभ्यते । अत्र कक्षागतं क्रमबद्धत्वं स्तरीकरणञ्च विधाय तेषामेव विषयवस्तूनां संयोजनं विहितमस्ति । अतोऽस्य पाठ्यक्रमस्याध्ययनेन छात्रा हस्तसञ्चालनपूर्वकं वैदिकमन्त्रसंहितायाः पाठे, उदात्तादिस्वरज्ञाने, याज्ञिकसन्दर्भानुकूलं मन्त्रप्रयोगे, निर्धारितमन्त्राणां भावार्थबोधने च समर्था भविष्यन्तीति । पाठ्यक्रमोऽसौ ज्ञानपक्षे न, अपि तु शिल्पाभिवृत्तिपक्षे विशेषतः प्रवृत्तो विद्यते । विषयवस्तूनां व्यावहारिकं प्रयोगात्मकञ्च शिक्षणमस्य मुख्यमुद्देश्यमस्ति ।

परिचयम्, स्तरगतसक्षमताम्, कक्षागतशिक्षणोपलब्धिम्, विषयवस्तुनः क्षेत्रक्रमौ, शिक्षणसहजीकरणप्रक्रियाम्, विद्यार्थिमूल्याङ्कनञ्च समाविश्य पाठ्यक्रमोऽसौ विकासं नीतः । एतस्मिन् क्रमे पाठ्यक्रमविकासस्य विषयगतौचित्यम्, पाठ्यक्रमे विद्यमाना मुख्यविशेषताः, पाठ्यक्रमस्य स्वरूपञ्च संयोज्य परिचयं, विषयगतरूपेणापेक्षितं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, मूल्यं, कार्यतत्परताञ्च संयोज्य एतस्याः क्रियात्मकस्वरूपे सक्षमताम्, शिक्षणस्य स्तरम्, सक्षमताया विशिष्टीकृतविस्तृतीकरणेन शिक्षणोपलब्धिम्, सक्षमताम्, पूर्वकक्षाभिस्सह लम्बीयसन्तुलनस्याधारे विषयवस्तुनः क्षेत्रक्रमौ च, विषयगतविशिष्टतामौलिकते च संयोज्य शिक्षणसहजीकरणस्य विधिम्, प्रक्रियाञ्च, निर्माणात्मकनिर्णयात्मकमूल्याङ्कनयोर्विधिं प्रक्रियाञ्चोल्लिख्य विद्यार्थिमूल्याङ्कनं व्यवस्थितं वर्तते ।

## २. विषयानुगताः क्षमताः

**माध्यमिकस्तरस्य नवमदशमकक्षयोः शुक्लयजुर्वेदविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति-**

१. वैदिकपरम्परानुरूपं गुरुमुखोच्चारणमनुसृत्य मन्त्रोच्चारणे ।

२. हस्तसञ्चालनपूर्वकं सस्वरं मन्त्राणां शुद्धोच्चारणे, लेखने च ।

३. नित्यनैमित्तिकादिकर्मसु, पर्वोत्सवादिषु च प्रयुक्तानां मन्त्राणां स्पष्टोच्चारणे, लेखने च ।

४. प्रचलितानां मानवीयमूल्यमान्यतानां संस्काराणाञ्च स्रोतसोऽवबोधे, प्रकाशने च ।

५. याज्ञवल्क्यशिक्षामनुसृत्य शुक्लयजुर्वेदाध्ययनविधेर्बोधे, अभिव्यक्तौ च ।

६. वेदाध्ययनस्य महत्त्ववैशिष्ट्यप्रकाशने ।

७. शुक्लयजुर्वेदमाध्यन्दिनसंहितायाः वर्णोच्चारणविषयकनियमावबोधे, अभिव्यक्तौ च ।

८. निर्धारितानां मन्त्राणां भावार्थबोधने, प्रकाशने च ।

## ३. कक्षागतशिक्षणोपलब्धयः

**कक्षा ९**

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. सौत्रामणीयागसम्बद्धानां सेकासन्ध्यादिकर्मप्रयुक्तानां याज्याप्रेषणादिकर्मप्रयुक्तानाञ्च मन्त्राणामुच्चारणलेखनादिकम् | १.१. गुरुमुखात् सौत्रामणीसम्बद्धानां सेकासन्ध्यादिकर्मप्रयुक्तानां याज्याप्रेषणादिकर्मप्रयुक्तानाञ्च मन्त्राणां श्रवणानन्तरं तदनुरूपं शुद्धोच्चारणम्,<br>१.२. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>१.३. निर्दिष्टमन्त्राणां शुद्धलेखनम्,<br>१.४. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |

| | |
|---|---|
| २. अश्वमेधयागसम्बद्धानां मन्त्राणामुच्चारणलेखनादिकम् | २.१. अश्वमेधयज्ञस्य परिभाषाप्रकाशनम्<br>२.२. अश्वमेधयागसम्बद्धानां मन्त्राणां गुरुमुखोच्चारणमनुसृत्य शुद्धोच्चारणम्,<br>२.३. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>२.४. निर्दिष्टमन्त्राणां सशुद्धिर्लेखनम्,<br>२.५. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| ३. आश्वमेधिकानां पशूनां देवतासम्बद्धमन्त्राणाम्, अश्वाङ्गहोममन्त्राणां च समुच्चारणलेखनादिकम् | ३.१. गुरुमुखान्निर्दिष्टमन्त्राणां श्रवणानन्तरं तदनुरूपं शुद्धोच्चारणम्,<br>३.२. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>३.३. निर्दिष्टमन्त्राणां सशुद्धिर्लेखनम्,<br>३.४. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| ४. खिलसंज्ञकमन्त्राणां पञ्चचितिकाग्निमन्त्राणाञ्च समुच्चारणलेखनादिकम् | ४.१. गुरुमुखोच्चारणमनुसृत्य निर्दिष्टमन्त्राणां शुद्धोच्चारणम्,<br>४.२. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>४.३. निर्दिष्टमन्त्राणां शुद्धलेखनम्,<br>४.४. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| ५. सौत्रामणीयानां प्रयाजानुयाजप्रैषमन्त्राणाम् आश्वमेधिकमन्त्राणाञ्च समुच्चारणलेखनादिकम् | ५.१. गुरुमुखान्निर्दिष्टमन्त्राणां श्रवणानन्तरं तदनुरूपं शुद्धोच्चारणम्,<br>५.२. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>५.३. निर्दिष्टमन्त्राणां शुद्धलेखनम्,<br>५.४. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| ६. याज्ञवल्क्यशिक्षायाः पूर्वार्धखण्डस्थविषयाणामवबोधः | ६.१. उदात्तादिस्वराणां सप्तस्वराणाञ्च स्वरूपप्रतिपादनम्,<br>६.२. वेदाध्ययनविधेः हस्तचालनविधेश्च प्रकाशनम्,<br>६.३. स्वरसंहितावबोधनम्,<br>६.४. स्वरितभेदप्रदर्शनसामर्थ्यम् । |

**कक्षा १०**

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. पुरुषमेधयज्ञसम्बद्धानां, पुरुषसूक्तगतानाम् | १.१. पुरुषमेधयज्ञस्य परिभाषाप्रकाशनम् |

| | |
|---|---|
| उत्तरनारायणसूक्तगतानाञ्च मन्त्राणामुच्चारणलेखनादिकम् । | १.२. गुरुमुखान्निर्दिष्टमन्त्राणां श्रवणानन्तरं तदनुरूपं शुद्धोच्चारणम्,<br>१.३. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>१.४. निर्दिष्टमन्त्राणां शुद्धलेखनम्,<br>१.५. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| २. सर्वमेधयज्ञसम्बद्धानां मन्त्राणामुच्चारणलेखनादिकम् । | २.१. सर्वमेधयज्ञस्य परिभाषाप्रकाशनम्<br>२.२. सर्वमेधयज्ञसम्बद्धानां मन्त्राणां गुरुमुखोच्चारणमनुसृत्य शुद्धोच्चारणम्,<br>२.३. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>२.४. निर्दिष्टमन्त्राणां सशुद्धिर्लेखनम्,<br>२.५. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| ३. शिवसङ्कल्पादिमन्त्राणां पैतृमेधिकमन्त्राणाञ्च समुच्चारणलेखनादिकम् । | ३.१. पितृमेधयागस्य परिभाषाप्रकाशनम्<br>३.२. गुरुमुखात् शिवसङ्कल्पादिमन्त्राणां पैतृमेधिकमन्त्राणाञ्च श्रवणानन्तरं तदनुरूपं शुद्धोच्चारणम्,<br>३.३. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>३.४. निर्दिष्टमन्त्राणां सशुद्धिर्लेखनम्,<br>३.५. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| ४. प्रवर्ग्याग्निकाश्वमेधोपनिषत्सम्बद्धानां मन्त्राणामुच्चारणलेखनादिकम् । | ४.१. गुरुमुखोच्चारणमनुसृत्य निर्दिष्टमन्त्राणां शुद्धोच्चारणम्,<br>४.२. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>४.३. निर्दिष्टमन्त्राणां सशुद्धिर्लेखनम्,<br>४.४. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| ५. महावीरसम्भरणघर्मधुग्दोहन-प्रवर्ग्यघर्मप्रभेदप्रायश्चित्तादीनां मन्त्राणामुच्चारणलेखनादिकम् । | ५.१. गुरुमुखान्निर्दिष्टमन्त्राणां श्रवणानन्तरं तदनुरूपं शुद्धोच्चारणम्,<br>५.२. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>५.३. निर्दिष्टमन्त्राणां शुद्धलेखनम्,<br>५.४. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| ६. ईशावास्योपनिषद्गतानां मन्त्राणामुच्चारणलेखनादिकम् । | ६.१. ईशावास्योपनिषद्गतमन्त्राणां गुरुमुखोच्चारणमनुसृत्य शुद्धोच्चारणम्, |

| | |
|---|---|
| | ६.२. निर्दिष्टमन्त्राणां हस्तसञ्चालनपूर्वकं सस्वरपठनम्,<br>६.३. निर्दिष्टमन्त्राणां शुद्धलेखनम्,<br>६.४. निर्धारितमन्त्राणां भावार्थबोधनप्रकाशने । |
| ७. याज्ञवल्क्यशिक्षायाः पूर्वार्धखण्डस्थविषयाणां पुनरावृत्तिः | ७.१. उदात्तादिस्वराणां सप्तस्वराणाञ्च स्वरूपप्रतिपादनम्,<br>७.२. वेदाध्ययनविधेः हस्तचालनविधेश्च प्रकाशनम्,<br>७.३. स्वरसंहितावबोधनम्,<br>७.४. स्वरितभेदप्रदर्शनसामर्थ्यम् । |
| ८. याज्ञवल्क्यशिक्षाया उत्तरार्धखण्डस्थविषयाणामवबोधः | ८.१. वर्णोच्चारणनियमावबोधनम्,<br>८.२. सन्धिभेदप्रदर्शनसामर्थ्यम्,<br>८.३. विवृत्तिस्वरभक्त्यादीनां स्वरूपप्रतिपादनम्,<br>८.४. प्लुतविसर्गादीनां ज्ञानम्,<br>८.५. रङ्गानां, पिण्डानाञ्च स्वरूपनिदर्शनम्,<br>८.६. वेदविद्याया महत्त्वप्रकाशनम् । |

## ४. विषयवस्तुनः क्षेत्रक्रमौ

### कक्षा ९

| क्र. सं | अध्यायः/ प्रकरणम् | विषयः | बोधः | अभिव्यक्तिः | कार्यघण्टाः | पूर्णाङ्काः |
|---|---|---|---|---|---|---|
| १ | २०-२१ | सौत्रामणीयागसम्बद्धाः सेकासन्द्यादिकर्मप्रयुक्ता याज्याप्रेषणादिकर्मप्रयुक्ताश्च मन्त्राः । | • गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>• ह्रस्वदीर्घप्लुतानां भेदः<br>• उदात्तादिस्वरत्रयम्<br>• हस्तसञ्चालनप्रक्रिया<br>• निर्धारितमन्त्राणां भावार्थः | • गुरुमुखोच्चारणानुकूलं स्पष्टतया मन्त्रोच्चारणम्<br>• ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>• उदात्तादिस्वराणां साधूच्चारणम्<br>• हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>• एकस्वरेण सामूहिकपाठः<br>• सस्वरं सशुद्धं मन्त्रलेखनम्<br>• निर्धारितमन्त्राणां भावार्थप्रकटनम् । | ३२ | २० |
| २ | २२-२३ | अश्वमेधयज्ञसम्बद्धा मन्त्राः । | • अश्वमेधयज्ञस्य परिभाषा<br>• गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>• ह्रस्वदीर्घप्लुतानां भेदः | • अश्वमेधयज्ञस्य परिभाषाप्रकटनम्<br>• गुरुमुखोच्चारणानुकूलं स्पष्टतया मन्त्रोच्चारणम्<br>• ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम् | १९ | १२ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | ● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | ● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् । | | |
| ३ | २४-२५ | आश्वमेधिकानां पशूनां देवतासम्बन्धविधायिनः, अश्वाङ्गहोमात्मकाश्च मन्त्राः । | ● गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>● ह्रस्वदीर्घप्लुतानां भेदः<br>● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | ● गुरुमुखोच्चारणानुकूलं मन्त्राणां स्पष्टोच्चारणम्<br>● ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् । | १६ | १० |
| ४ | २६-२७ | खिलसंज्ञकाः मन्त्राः, पञ्चचितिकाग्निमन्त्राश्च । | ● गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>● ह्रस्वदीर्घप्लुतानां भेदः<br>● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | ● गुरुमुखोच्चारणानुकूलं स्पष्टतया मन्त्रोच्चारणम्<br>● ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् । | ११ | ७ |
| ५ | २८-२९ | सौत्रामणीयाः प्रयाजानुयाजप्रैषमन्त्राः अश्वमेधमन्त्राश्च । | ● गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>● ह्रस्वदीर्घप्लुतानां भेदः<br>● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | ● गुरुमुखोच्चारणानुकूलं मन्त्राणां स्पष्टोच्चारणम्<br>● ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् । | १० | ६ |
| ६ | याज्ञवल्क्य -शिक्षा (पूर्वार्धः) | मङ्गलाचरणम्, उदात्तादिस्वरत्रयम्, सप्तस्वराः, मात्राज्ञानम्, वेदाध्ययनविधिः, हस्तचालनविधिः, स्वरसंहिता, | ● शुक्लयजुर्वेदीयमाध्यन्दिन -संहितायाः स्वरवर्णानाम् उच्चारणनियमावबोधः<br>● शुक्लयजुर्वेदाध्ययनविधेबोधः<br>● शुक्लयजुर्वेदीयमन्त्राणां | ● शुक्लयजुर्वेदीयमाध्यन्दिनसंहितायाः स्वरवर्णानामुच्चारणनियमप्रकटनम्<br>● स्वरवर्णोच्चारणनियमलेखनम्<br>● निर्दिष्टनियमानुसारेण स्वरवर्णानां सम्यगुच्चारणम् | ३२ | २० |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | स्वरितभेदाश्चेत्यादयः । | हस्तसञ्चालनप्रकारबोधनम् | ● शुक्लयजुर्वेदाध्ययनविधेः प्रकाशनम्<br>● हस्तचालनपूर्वकं शुक्लयजुर्वेदीयमन्त्रोच्चारणम्<br>● हस्तचालनविधेः प्रकटनम् । | | |
| **सैद्धान्तिकाभ्यासः** | | | | | **१२०** | **७५** |
| **प्रयोगाभ्यासः** | | | | | **४०** | **२५** |
| **योगः** | | | | | **१६०** | **१००** |

**अधोलिखितानां मन्त्रप्रतीकानां भावार्थबोधनम् :**

१. जिह्वामे भद्रम् (२०/६) २. पृष्टीर्मे राष्ट्रम् (२०/८) ३) नाभिर्मे चित्तम् (२०/९)

४. यद्देवादेवहेडनम् (२०/१४) ५. यदिदिवा (२०/१५) ६) यदिजाग्रत् (२०/१६)

७. यद्ग्रामे (२०/१७) ८. इन्द्रन्दुरः (२०/४०) ९) त्वामद्य ऋषे (२१/६१)

१०. हिरण्यपाणिमूतये (२२/१०) ११. देवस्यचेततः (२२/११) १२) देवस्यसवितुः (२२/१४)

१३. आब्रह्मन् (२२/२२) १४. स्वयं वाजिन् (२३/१५)

१५. आनो भद्रा (२५/ १६. इत्यारभ्य अदितिर्द्यौरित्यन्ताः दशमन्त्राः १७. सुगव्यन्नो वाजी (२५/४५)

१८. यथेमां वाचम् (२६/२) १९. सञ्चेद्धयस्वाग्ने (२७/२) २०. त्वामग्ने वृणते (२७/३)

२१. केतुं कृण्वन् (२९/३७) २२. तीव्रान्घोषान् (२९/४४) २३. रथवाहणम् (२९/४४)

२४. ऋजीते (२९/४९) २५. आमूरज (२९/५७)

**कक्षा १०**

| **क्र. सं** | **अध्यायः/ प्रकरणम्** | **विषयः** | **बोधः** | **अभिव्यक्तिः** | **कार्य घण्टाः** | **पूर्णाङ्काः** |
|---|---|---|---|---|---|---|
| १ | ३०–३१ | पुरुषमेधयज्ञसम्बद्धाः, पुरुषसूक्तगताः, उत्तरनारायणसूक्तगताश्च मन्त्राः । | ● पुरुषमेधयज्ञस्य परिभाषा<br>● गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>● ह्रस्वदीर्घप्लुतानां भेदः<br>● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | ● पुरुषमेधयज्ञस्य परिभाषाप्रकटनम्<br>● गुरुमुखोच्चारणानुकूलं स्पष्टतया मन्त्रोच्चारणम्<br>● ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् | २४ | १५ |
| २ | ३२–३३ | सार्वमेधिका मन्त्राः । | ● सर्वमेधयज्ञस्य परिभाषा<br>● गुरुमुखोच्चारणानुरूपं | ● सर्वमेधयज्ञस्य परिभाषाप्रकटनम्<br>● गुरुमुखोच्चारणानुकूलं स्पष्टतया | १६ | १० |

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | लयप्रभेदः<br>● ह्रस्वदीर्घप्लुतानां भेदः<br>● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | मन्त्रोच्चारणम्<br>● ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् | | |
| ३ | ३४–३५ | शिवसङ्कल्पादिमन्त्राः, पैतृमेधिकमन्त्राश्च । | ● पितृमेधयज्ञस्य परिभाषा<br>● गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>● ह्रस्वदीर्घप्लुतानां भेदः<br>● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | ● पितृमेधयज्ञस्य परिभाषाप्रकटनम्<br>● गुरुमुखोच्चारणानुकूलं स्पष्टतया मन्त्रोच्चारणम्<br>● ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् | १६ | १० |
| ४ | ३६ | प्रवर्ग्याग्निकाश्वमेधोपनिषत्सम्बद्धा मन्त्राः । | ● गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>● ह्रस्वदीर्घप्लुतानां भेदः<br>● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | ● गुरुमुखोच्चारणानुकूलं स्पष्टतया मन्त्रोच्चारणम्<br>● ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् | ८ | ५ |
| ५ | ३७–३९ | महावीरसम्भरणघर्मधुग्दोहनप्रवर्ग्यघर्मभेदप्रायश्चित्तादिमन्त्राः । | ● गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>● ह्रस्वदीर्घप्लुतानां भेदः<br>● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | ● गुरुमुखोच्चारणानुकूलं मन्त्राणां स्पष्टोच्चारणम्<br>● ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् | ११ | ७ |
| ६ | ४० | ईशावास्योपनिषदो मन्त्राः । | ● गुरुमुखोच्चारणानुरूपं लयप्रभेदः<br>● ह्रस्वदीर्घप्लुतानां भेदः<br>● उदात्तादिस्वरत्रयम्<br>● हस्तसञ्चालनप्रक्रिया<br>● निर्धारितमन्त्राणां भावार्थः | ● गुरुमुखोच्चारणानुकूलं स्पष्टतया मन्त्रोच्चारणम्<br>● ह्रस्वदीर्घप्लुतानां सम्यगुच्चारणम्<br>● उदात्तादिस्वराणां साधूच्चारणम्<br>● हस्तसञ्चालनपूर्वकं मन्त्रोच्चारणम्<br>● एकस्वरेण सामूहिकपाठः<br>● सस्वरं सशुद्धं मन्त्रलेखनम्<br>● निर्धारितमन्त्राणां भावार्थप्रकटनम् | १३ | ८ |
| ७ | याज्ञवल्क्य | मङ्गलाचरणम्, | ● शुक्लयजुर्वेदीयमाध्यन्दिन-संहितायाः स्वरवर्णानाम् | ● शुक्लयजुर्वेदीयमाध्यन्दिनसंहितायाः स्वरवर्णानामुच्चारणनियमप्रकटनम् | १३ | ८ |

| | | | | | | |
|---|---|---|---|---|---|---|
| | -शिक्षा (पूर्वार्धस्य पुनरावृत्तिः ) | उदात्तादिस्वरत्रयम्, सप्तस्वराः, मात्राज्ञानम्, वेदाध्ययनविधिः, हस्तचालनविधिः, स्वरसंहिता, स्वरितभेदाश्चेत्यादयः । | उच्चारणनियमावबोधः<br>● शुक्लयजुर्वेदाध्ययनविधेर्बोधः<br>● शुक्लयजुर्वेदीयमन्त्राणां हस्तसञ्चालनप्रकारबोधनम् | ● स्वरवर्णोच्चारणनियमलेखनम्<br>● निर्दिष्टनियमानुसारेण स्वरवर्णानां सम्यगुच्चारणम्<br>● शुक्लयजुर्वेदाध्ययनविधेः प्रकाशनम्<br>● हस्तचालनपूर्वकं शुक्लयजुर्वेदीयमन्त्रोच्चारणम्<br>● हस्तचालनविधेः प्रकटनम् | | |
| ८ | याज्ञवल्क्य -शिक्षा (उत्तरार्धः ) | वर्णोच्चारणम्, सन्धिभेदाः, विवृत्तयः, स्वरभक्तयः, प्लुतज्ञानम्, विसर्गज्ञानम्, रङ्गाः, पिण्डाः, वेदविद्याया महिमा चेत्यादयः । | ● शुक्लयजुर्वेदीयमाध्यन्दिन संहिताया वर्णानाम् उच्चारणनियमावबोधः<br>● रङ्गपिण्डविसर्गादीनां स्वरूपम्<br>● वेदविद्याया महत्त्वबोधनम् | ● शुक्लयजुर्वेदीयमाध्यन्दिनसंहिताया वर्णानामुच्चारणनियमप्रकटनम्<br>● वर्णोच्चारणनियमलेखनम्<br>● निर्दिष्टनियमानुसारेण वर्णानां सम्यगुच्चारणम्<br>● रङ्गपिण्डविसर्गादीनां स्वरूपकथनम्<br>● वेदविद्याया महत्त्वप्रकाशनम् | १९ | १२ |
| **सैद्धान्तिकाभ्यासः** | | | | | **१२०** | **७५** |
| **प्रयोगाभ्यासः** | | | | | **४०** | **२५** |
| **योगः** | | | | | **१६०** | **१००** |

**अधोलिखितानां मन्त्रप्रतीकानां भावार्थबोधनम् :**

१. विश्वानिदेव (३०/३) २. ब्राह्मणोस्यमुखम् (३१/११) ३. चन्द्रमामनसः (३१/१२)

४. तदेवाग्निः (३२/१) ५. याम्मेधाम् (३२/१४) ६. मेधाम्मे (३२/१५)

७. इदम्मे (३२/१६) ८. अग्नेशर्द्धमहते (३३/१२) ९. इन्द्रवायू सुसन्दृशा (३३/८६)

१०. दिविपृष्टो अरोचताम् (३३/९२) ११. यज्जाग्रतो दूरम् (३४/१) १२. येनकर्म्माणि (३४/२)

१३. यत्प्रज्ञानम् (३४/३) १४. येनेदम्भूतम् (३४/४) १५. यस्मिन्नृचः (३४/५)

१६. सुषारथिरश्वा (३४/६) १७. तत्सूर्यस्य देवत्वम् (३४/३७) १८. भग एव भगवान् (३४/३८)

१९. अपेतो यन्तु (३५/१) २०. कल्पन्तान्ते दिशः (३५/९) २१. सुमित्रियान आपः (३५/१२)

२२. वहवपां जातवेदः (३५/२०) २३. स्योना पृथिवि (३५/२१) २४. ऋचम्वाचं प्रपद्ये (३६/१)

२५. यन्मे छिद्रम् (३६/२) २६. भूर्भुवः स्वः (३६/३) २७. इन्द्रो विश्वस्य (३६/८)

२८. शन्नो मित्रः (३६/९) २९. शन्नोदेवीः (३६/१२) ३०. द्यौःशान्तिः (३६/१७)

३१. दृतेदृंहमा (३६/१८) ३२. तच्चक्षुर्द्देवहितम् (३६/२४) ३३. क्षत्रस्यत्वा (३८/१९)

३४. चतुः स्रक्तिर्नाभिः (३८/२०) ३५. मनसः कामम् (३९/४) ३६. उग्रं लोहितेन (३९/९)

३७. ईशावास्यम् (४०/१) ३८. कुर्वन्नेवेह (४०/२) ३९. अग्नेनय सुपथा (४०/१६)

४०. हिरण्मयेन पात्रेण (४०/१७)

## ५. परियोजनाकार्यमन्ये क्रियाकलापाश्च

इमे क्रियाकलापाः सम्भाव्याः सन्ति । एतान् क्रियाकलापान् निदर्शनस्वरुपेण मत्वा अन्येऽपि क्रियाकलापाः सञ्चालयितुं शक्यन्ते ।

| **क्र.सं.** | **क्षेत्रम्** | **परीक्षणीयाः पक्षाः** | **मूल्याङ्कनाधाराः** | **पाठ्यघण्टाः** |
|---|---|---|---|---|
| १. | उपस्थितिः | उपस्थितिः | विद्यार्थिनां दैनिकोपस्थितेरभिलेखः | |
| २. | परियोजनात्मकं कार्यम् | परियोजनात्मकं कार्यम् | ➢ पठितानां पाठाधारेण मन्त्रसङ्कलनम्, तद्वर्गीकरणम्, मन्त्रसूचीनिर्माणम्, तत्प्रस्तुतीकरणं च । | ४ |
| ३. | श्रवणकार्यकलापः | श्रुतवर्णनम्, अनुवाचनम् | ➢ श्रवणेन स्वरादिपरिचयप्रदानम्, मन्त्रश्रवणपूर्वकं तदनुवाचनम्, विषयवस्तुसम्बद्धानां प्रश्नानामुत्तरणम्, प्रतिक्रियाप्रदानञ्च । | २ |
| | | श्रुतलेखनम् | ➢ मन्त्रान् श्रुत्वा लेखनम् | २ |
| ४. | भाषणकार्यकलापः | उच्चारणम् | ➢ निर्धारितमन्त्राणामुच्चारणम् । | ३ |
| | | सस्वरवाचनम् | ➢ हस्तसञ्चालनपूर्वकं सस्वरं मन्त्रवाचनम् | २ |
| | | भाषिकः सञ्चारः | ➢ अनुभवकथनम्, मन्त्रोच्चारणम्, यज्ञेषु मन्त्रप्रयोगः, मन्त्रार्थप्रकटनम् । | ३ |
| ५ | पठनकार्यकलापः | सस्वरपठनम्, तद्गतिवृद्धिश्च | ➢ निर्धारितसमये निर्दिष्टान् मन्त्रान् पठितुमादिश्य शुद्धतायाः पठनगतेश्च परीक्षणम् । | २ |
| | | पठनबोधः | ➢ वैदिकचिह्नं दृष्ट्वा वर्णयितुम्, पाठं पठित्वा तत्सम्बद्धान् प्रश्नान् निर्मातुम्, तदुत्तराणि कथयितुं चाऽऽदिश्य परीक्षणम् । | २ |
| ६ | लेखनकार्यकलापः | वर्ण-पद-वाक्यानां | ➢ वर्णानां, पदानां, वाक्यानां, मन्त्राणां वा | २ |

| | | | | |
|---|---|---|---|---|
| | | लेखनम् | लेखनम्, अनुलेखनम्, श्रुतलेखनञ्च | |
| | | निर्दिष्टलेखनम् | ➢ मन्त्राणां, पाठगतप्रश्नोत्तराणां च लेखनम् | २ |
| ७ | अवलोकनम् | भाषिकव्यवहारः | ➢ मन्त्राणामुच्चारणे याज्ञिकप्रयोगे च भाषिकशुद्धता । | २ |
| | | कक्षाकार्यं क्रियाशीलशिक्षणञ्च | ➢ वैयक्तिक-युगल-सामूहिककार्येषु सहभागिताया नेतृत्वस्य चावलोकनम् | १ |
| | | कार्यप्रदर्शनम् | ➢ कक्षाकार्यस्य गृहकार्यस्य अतिरिक्तकार्यकलापस्य याज्ञिकप्रयोगात्मककार्याणाञ्च प्रदर्शनम् | २ |
| ८ | परीक्षा | नियमितपरीक्षा | ➢ आवधिकी परीक्षा (दैनिक्याः पाठगताया विषयक्षेत्रगताया आकस्मिक्याश्चोपलब्धेः परीक्षणम्) | ३ |
| योगः | | | | ३२ |

## ६. शिक्षणसञ्चालनप्रक्रिया

प्राचीनकालादेव वेदाध्ययनस्य स्वकीया मौलिकी परम्परा प्रचलन्ती विद्यते । परम्परायामस्यां गुरुमुखोच्चारणमनुसृत्य श्रुतिमाध्यमेनाध्ययनं भवति । अतो विषयस्यास्य शिक्षणसाफल्यार्थं विषयवस्तूनां प्रकृत्यनुरूपमधोङ्कितानां शिक्षणविधीनामवलम्बनं कर्तुं शक्यते -

(क) प्रदर्शनविधिः (ख) विमर्शनविधिः (ग) प्रश्नोत्तरविधिः

(घ) अभिनयविधिः (ङ) प्रयोगात्मकविधिः (च) अवलोकनविधिः

शिक्षणसहजीकरणप्रक्रियायाम् उल्लिखितानां शिक्षणविधीनां प्रयोगे शिक्षकेणाधोङ्किता विषया अवलम्बनीयाः -

१. वार्षिकीं प्राकरणिकीं दैनिकीञ्च पाठयोजनां निर्माय शिक्षणसहजीकरणं/अध्यापनं कर्तव्यम् ।

२. आगामिन्यां कक्षायां पाठ्यविषयस्य सङ्केतः पूर्वकक्षायामेव प्रदातव्यः ।

३. विद्यार्थिनां स्तररुचिक्षमतादीन् विचार्य तदनुरूपमध्यापनीयम् ।

४. पाठ्यविषयेषु विद्यार्थिनां चित्ताकर्षणार्थं तेषां महत्त्वं बोधयन् समुत्प्रेरणीयम् ।

५. वेदाध्यायिनो वेदाध्यापकस्य चाऽऽहारविहारादिषु शुद्धताऽपेक्षणीया ।

६. गुरुं विना नैवाध्येयो वेदः ।

७. गुरुमुखोच्चारणपूर्वकमेव तदनुरूपं मन्त्रोच्चारणस्य व्यवस्था विधेया ।

८. मन्त्रोच्चारणस्यैकरूपतायै कक्षायां सामूहिकाभ्यासो विधेयः ।

९. छात्रेषूदात्तादिस्वराणां बोधस्तदनुरूपं हस्तसञ्चालनं चापेक्षणीयम् ।

१०. पूर्वाध्यापितविषयमाधृत्य कक्षायां विद्यार्थिभिः सह प्रश्नोत्तरं विधेयम् ।

११. विद्यार्थिषु समव्यवहारः प्रदर्शनीयः ।

१२. मन्दमतीनां विद्यार्थिनां कृते विशिष्टा व्यवस्था विधेया ।

१३. मन्त्रकण्ठस्थीकरणे छात्राः समुत्प्रेरणीयाः । छात्रैः कण्ठस्थीकृता मन्त्राः श्रोतव्याः ।

१४. वेदस्याध्यायगतविषयवस्तूनां निर्देशः करणीयः ।

१५. निर्दिष्टमन्त्राणां भावार्थः प्रकाशनीयः ।

१६. याज्ञवल्क्यशिक्षामनुसृत्य वेदाध्यापनं करणीयम् । तदनुरूपं शिक्षणं विहितं न वेति परीक्षणीयम् ।

१७. प्रत्यक्षतः यन्त्रेण वा यथासम्भवं वैदिकयज्ञानां यज्ञशालानां यज्ञियपात्राणाञ्चावलोकने छात्राः प्रेरयितव्याः ।

१८. शिक्षणानन्तरं छात्रेषु योग्यता स्थापिता न वेति च परीक्षणीयम् ।

## ७. विद्यार्थिमूल्याङ्कनप्रक्रिया

स्तरस्यास्य विद्यार्थिमूल्याङ्कनप्रक्रिया सम्प्रति प्रचलिताक्षराङ्कनपद्धत्या विधीयते । मूल्याङ्कने निर्माणात्मकं निर्णयात्मकञ्चेति प्रक्रियाद्वयमवलम्ब्यते ।

### (क) निर्माणात्मकमूल्याङ्कनम्

कक्षाकार्य-गृहकार्य-कक्षासहभागिता-प्रकरणपरीक्षा-पाक्षिकपरीक्षा-मासिकपरीक्षामाध्यमेन विद्यार्थिनां योग्यताभिवृद्धये प्रयासो विधीयते । एवमेव शिक्षणक्रमे शिक्षणदुर्बलविद्यार्थिभ्यो व्यावहारिकपरिवर्तनाय तेषां कृते शिक्षणकार्यस्य सहजीकरणायोपयुक्तवातावरणनिर्माणं क्रियते । तत्क्रमे स्तरानुगतयोग्यताभिवृद्धये सामूहिकविमर्शन-मौखिकपरीक्षालिखितपरीक्षाप्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तरण-कक्षाकार्यपरीक्षणप्रभृतिकार्यैर् निर्माणात्मकं मूल्याङ्कनं विधीयते । माध्यमेनानेन विद्यार्थिनां योग्यतावृद्धिर्भवेत् ।

**(ख) निर्णयात्मकमूल्याङ्कनम्**

पाठ्यक्रमस्योद्देश्यानुरूपं ज्ञानं विद्यार्थिभ्यो प्रापितं नवेति स्पष्टीकरणार्थमावधिकरूपेण मूल्याङ्कनं कृत्वा छात्राणां योग्यतानिर्धारणं क्रियते । स्तरोन्नतये कक्षोन्नतये च शैक्षिकसत्रस्यान्ते निर्णयात्मकमूल्याङ्कनमन्तिमपरीक्षाया माध्यमेन विधीयते । प्रायशस्त्रैमासिक परीक्षारूपेण षाण्मासिकपरीक्षारूपेण वार्षिकपरीक्षारूपेण च तादृशो निर्णयः क्रियते ।

मूल्याङ्कनप्रणालीं विश्वसनीयां विधिसम्मताञ्च विधायैकरूपतामानेतुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरीयाणां बाह्यसार्वजनिकपरीक्षणं सर्वेषु विषयेष्वान्तरं बाह्या च मूल्याङ्कनपद्धतिः क्रियान्वयन आनीयते । सार्वजनिकपरीक्षायाः प्रत्येकं विषये प्रतिशतं पञ्चविंशत्यङ्कानामान्तरिकं प्रतिशतं पञ्चसप्तत्यङ्कानां बाह्यमूल्याङ्कनं भवति । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेण विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुनो मूल्याङ्कनं निरन्तरं विधेयम् । औपचारिकेणानौपचारिकेण च शिक्षणोपलब्धिः क्रमेण परिमापणीया । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनं कर्तव्यम् ।

**(अ) आन्तरं मूल्याङ्कनम्**

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

**(आ) बाह्यमूल्याङ्कनम्**

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पमधिगतं नवेति सम्परीक्ष्य तदनुसारेण छात्राणामुत्तीर्णत्वमनुत्तीर्णत्वं वा निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतद् मूल्याङ्कनं विधीयते ।

# विशिष्टीकरणतालिका

**कक्षा : १०** **समयः घण्टात्रयम्** **पूर्णाङ्काः ७५**

| **क्र. स.** | **विषयक्षेत्रम्** | **प्रश्नस्य प्रकृतिः** | **ज्ञानम्** | | | **बोधः** | | | **शिल्पम्** | | | **उच्चदक्षता** | | | **समाधातव्या प्रश्न-सङ्ख्या** | **अङ्क भारः** | **स्पष्टीकरणम्** |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | | | |
| १ | पुरुषमेधयज्ञसम्बद्धाः, पुरुषसूक्तगताः, उत्तरनारायणसूक्तगताश्च मन्त्राः । | ज्ञानबोध-प्रयोगोच्च-दक्षताः | १ | | | १ | | | | ५ | | | | ८ | ४ | १५ | **ज्ञानबोधक्षेत्रतः**<br>• निर्दिष्टविषयेषु द्वित्रादिशब्दैरुत्तरप्रदानात्मकः (वस्तुनिष्ठः) एकः प्रश्नः ।<br>• निर्दिष्टविषयबोधात्मक बहुवैकल्पिक एकः प्रश्नः ।<br>**शिल्पक्षेत्रतः**<br>• एकस्त्रिंशाध्यायतो लघुमन्त्रप्रतीकत्रयस्य दीर्घमन्त्रप्रतीकयोर्वा सस्वरपूरणात्मकः एकः प्रश्नः ।<br>**उच्चदक्षताक्षेत्रतः**<br>• त्रिंशाध्यायतः प्रदत्तमन्त्रप्रतीकत्रयेषु द्वयोः सस्वरपूरणात्मक एकः प्रश्नः । *अथवा*<br>प्रदत्तमन्त्रप्रतीकत्रयेषु द्वयोः पूरणपूर्वकं भावार्थप्रकाशनपर एकः प्रश्नः । |
| २ | सार्वमेधिका मन्त्राः । | प्रयोगः | | | | | | | | १० | | | | | २ | १० | **शिल्पक्षेत्रतः**<br>• पञ्चमन्त्राणामाद्यन्तौ *(अत्राधिकविकल्पो देयः)* दत्वा परस्परमेलनात्मकः एकः प्रश्नः ।<br>• प्रदत्तमन्त्रप्रतीकत्रयेषु द्वयोः सस्वरपूरणात्मकः, एकस्य पूरणपूर्वकं भावार्थप्रकाशनपरो वा एकः प्रश्नः । |
| ३ | शिवसङ्कल्पादिमन्त्राः, पैतृमेधिकमन्त्राश्च । | ज्ञानबोधोच्चदक्षताः | १ | | | १ | | | | | | | | ८ | ३ | १० | **ज्ञानबोधक्षेत्रतः**<br>• प्राकरणिकार्थलेखनात्मकः एकः प्रश्नः ।<br>• निर्दिष्टविषयबोधात्मक बहुवैकल्पिक एकः प्रश्नः ।<br>**उच्चदक्षताक्षेत्रतः**<br>• प्रदत्तमन्त्रप्रतीकत्रयेषु त्रयाणामेव सस्वरपूरणात्मकः, द्वयोः पूरणपूर्वकं भावार्थप्रकाशनपरो वा एकः प्रश्नः । |
| ४ | प्रवर्ग्याग्निकाश्वमेधोपनिषत्सम्बद्धा मन्त्राः । | प्रयोगः | | | | | | | | | | | | ८ | १ | ८ | **उच्चदक्षताक्षेत्रतः**<br>• लघुमन्त्रप्रतीकत्रयस्य दीर्घमन्त्रप्रतीकयोर्वा सस्वरपूरणपूर्वकं भावार्थप्रकाशनपर एकः प्रश्नः । |

| | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| ५ | महावीरसम्भरणघर्मधुग्दोहनप्रवर्ग्यघर्मभेदप्रायश्चित्तादिमन्त्राः । | ज्ञानबोध-प्रयोगाः | १ | | | १ | | | | ५ | | | | | ३ | ७ | **ज्ञानबोधक्षेत्रतः**<br>• लघुमन्त्रस्य रिक्तस्थानपूरणात्मकः एकः प्रश्नः ।<br>• निर्दिष्टविषयबोधात्मक बहुवैकल्पिक एकः प्रश्नः ।<br>**शिल्पक्षेत्रतः**<br>• चतुरो लघुमन्त्रप्रतीकान् दत्वा तेषु त्रयाणाम्, त्रीन् दीर्घमन्त्रप्रतीकान् दत्वा तेषु द्वयोर्वा सस्वरपूरणात्मकः एकः प्रश्नः । |
| ६ | ईशावास्योपनिषदो मन्त्राः । | उच्चदक्षता | | | | | | | | ५ | | | | | १ | ५ | **शिल्पक्षेत्रतः**<br>• द्वौ मन्त्रप्रतीकौ दत्वा एकस्य पूरणपूर्वकमर्थप्रकाशनपर एकः प्रश्नः । |
| ७ | याज्ञवल्क्यशिक्षा-पूर्वार्धः (मङ्गलाचरणम्, उदात्तादिस्वरत्रयम्, सप्तस्वराः, मात्राज्ञानम्, वेदाध्ययनविधिः, हस्तचालनविधिः, स्वरसंहिता, स्वरितभेदाश्चेत्यादयः) | ज्ञानबोध-प्रयोगाः | १ | | | २ | | | | ५ | | | | | ४ | ८ | **ज्ञानबोधक्षेत्रतः**<br>• स्वरवर्णोच्चारणविषयसम्बद्धो वस्तुनिष्ठ एकः प्रश्नः ।<br>• निर्दिष्टविषयबोधात्मकौ बहुवैकल्पिकौ प्रश्नौ ।<br>**शिल्पक्षेत्रतः**<br>• पद्यपूरणपूर्वकं पदार्थप्रकाशनपरः, विषयस्य परिचयप्रदानात्मको वा एकः प्रश्नः । |
| ८ | याज्ञवल्क्यशिक्षा-उत्तरार्धः (वर्णोच्चारणम्, सन्धिभेदाः, विवृत्तयः, स्वरभक्तयः, प्लुतज्ञानम्, विसर्गज्ञानम्, रङ्गाः, पिण्डाः, वेदविद्याया महिमा चेत्यादयः) | ज्ञानबोध-प्रयोगाः | १ | | | १ | | | | १० | | | | | ४ | १२ | **ज्ञानबोधक्षेत्रतः**<br>• विषयसम्बद्धो वस्तुनिष्ठ एकः प्रश्नः ।<br>• निर्दिष्टविषयबोधात्मक बहुवैकल्पिक एकः प्रश्नः ।<br>**शिल्पक्षेत्रतः**<br>• पद्यपूरणपूर्वकं पदार्थप्रकाशनपरौ, विषयस्य परिचयप्रदानात्मकौ वा द्वौ प्रश्नौ । |
| | | **योगः** | **५** | | | **६** | | | | **४०** | | | | **२४** | **२२** | **७५** | |

**द्रष्टव्यः** क इत्यनेन अतिलघुप्रश्नो बोध्यते ।
ख इत्यनेन लघुप्रश्नो बोध्यते ।
ग इत्यनेन सामान्यतया विस्तृतोत्तरापेक्षी (व्याख्यात्मकः) प्रश्नो बोध्यः ।

**पुनश्च -** ज्ञानबोधक्षेत्रयोः विकल्परहिताः प्रश्नाः प्रष्टव्याः । शिल्पक्षेत्रात् यथेच्छप्रकरणतः प्रश्नद्वयं संयोज्य आहत्य दश प्रश्नाः प्रष्टव्याश्चेद् उच्चदक्षताक्षेत्राद् यथेच्छप्रकरणतः प्रश्नमेकं संयोज्य आहत्य चत्वारः प्रश्नाः प्रष्टव्याः । आहत्य तेषु दशसु छात्रैरष्टौ प्रश्नाः समाधेयाश्चेच्चतुर्षु प्रश्नत्रयं समाधेयम् ।

# आदर्शप्रश्नपत्रम्

## विषयः - शुक्लयजुर्वेदः

कक्षा - १०　　　　　　　　　　　　　　　　　　पूर्णाङ्काः - ७५

*(परीक्षार्थिना यथासम्भवं शुद्धं, स्पष्टं, मौलिकञ्चोत्तरं लेखनीयम्, तादृशमुत्तरं विशिष्यते ।)*

---

**प्रथमः खण्डः**

**सङ्क्षेपेणोत्तरयत ।**　　　　　　　　　　　　　　　　**५ह्१=५**

१. त्रिंशाध्यायस्य आदिमचरणौ मन्त्रप्रतीकौ लिखत ।

२. पितृमेधशब्दस्य प्राकरणिकार्थः कः ?

३. मन्त्रपूर्तिर्विधेया ।

अदित्यैरास्नासि ..........घर्मायदीष्व ।

४. कुत्र कुत्र शून्यहस्तं विधीयते ?

५. विसर्गस्य स्वरूपाणि कानि ?

**द्वितीयः खण्डः**

**कोष्ठात् सर्वोपयुक्तमुत्तरमवचित्य समुत्तरयत ।**　　　　　　**६ह्१=६**

६. वायुः कस्माज्जातः ? (पादाद्, श्रोत्राद्, घ्राणाद्, मुखाद्)

७. 'अपाघमप' एष मन्त्रः कस्मिन्नध्यायेऽस्ति ? (३१, ३३, ३५, ३७)

८. अष्टत्रिंशाध्याये कति मन्त्राः सन्ति ? (३५, २१, ३८, ३७)

९. का नास्ति स्वरभक्तिः ? (करिणी, कारिणी, हरिणी, हारिणी)

१०. रङ्गाः कति सन्ति ? (४, ५, ६, ७)

११. पाठकस्य गुणाः कति सन्ति ? (४, ५, ६, ७)

## तृतीयः खण्डः

**केचनाष्टौ प्रश्नाः समाधेयाः, अन्तिमौ न हेयौ ।** **८ह्५=४०**

१२. एतौ मन्त्रप्रतीकौ सस्वरं पूरणीयौ ।

चन्द्रमामनसः । यज्ञेनयज्ञम् ।

१३. परस्परं मेलयत :

| | |
|---|---|
| एषोहदेवः | ईदृशे |
| मेधाम्मे | देवाः |
| अस्मेरुद्रा | स्वस्तये |
| उग्राविघनिना | हव्यदातये |
| ऋधगित्था | सर्वतोमुखः |
| | स्वाहा |

१४. यथेच्छं मन्त्रद्वयं सस्वरं विलेखनीयम् ।

याम्मेधाम् । अयमिह । इन्द्रवायू सुसन्दृशा ।

१५. स्वेच्छया द्वौ मन्त्रौं सस्वरं पूरयत ।

युञ्जते मनः । क्षत्रस्यत्वा । मनसः कामम् ।

१६. निजेच्छया मन्त्रप्रतीकमेकं प्रपूर्य भावार्थञ्च समुल्लिखत ।

ईशावास्यम् । हिरण्मयेन पात्रेण ।

१७. एतौ मन्त्रप्रतीकौं सस्वरं पूरणीयौ ।

ऋचं वाचम् । अहानिशम् ।

१८. मन्त्रमेकं प्रपूर्य भावार्थो लेख्यः ।

सुषारथिरश्वा । कल्पन्तान्ते दिशः । सुमित्रियानः ।

१९. उदात्तादिस्वरत्रयस्य वर्ण-देवता-जाति-गोत्र-छन्दांसि सप्रमाणं निर्धारयत ।

२०. विवृत्तेः भेदाः कति सन्ति ? तेषां लक्षणमुदाहरणञ्च प्रदर्शयत ।

२१. पिण्डाः कतिविधा भवन्ति ? लक्षणेनोदाहरत ।

## चतुर्थः खण्डः

**प्रश्नत्रयं समाधेयम् ।** **३ह्८=२४**

२२. यथेच्छं मन्त्रद्वयं सस्वरं पूरणीयम् ।
ब्रह्मणे ब्राह्मणम् । नदीब्भ्यः पौञ्जिष्ठम् । अथैतानष्टौ ।

२३. द्वयोरेव सस्वरपूरणपूर्वकं भावार्थं प्रकाशयत ।
यज्जाग्रतः । भग एव भगवान् । कल्पन्तान्ते दिशः ।

२४. मन्त्रद्वयं प्रपूर्य भावार्थो लेख्यः ।
यन्मे छिद्रम् । शन्नो मित्रः । तच्चक्षुर्देवहितम् ।

२५. अधस्तान् मन्त्रान् सस्वरं विलिखत ।
परीत्यभूतानि । आकृष्णेनरजसा । चन्द्रमा अप्स्वन्तरा ।